# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-१ ( Sem_2 )** **प्रश्नपत्र-५** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CC 1.2.3 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २२-०४-२०१६** **सन्दर्भग्रन्थः - श्रीमद्भागवतमहापुराणे तृतीयस्कन्धः**

---

### युनिट-१

**प्रश्नः -१ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गं संस्कृते भावार्थो लेख्यः । ०८**

*(१) यश्च मूढतमो लोके यश्च वृद्धेः परं गतः ।*
*तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥*

*(२) अहो बलीयं स्तनकालकूटं जिघांसयाऽपाययदप्यसाध्वी ।*
*लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥*

*(३) यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ।*
*रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥*

**प्रश्नः -२ भगवतः लीलावतारचरित्राणि वर्णयन्तु । ०८**

**अथवा**

**दशप्रकारात्मिकां सृष्टिं वर्णयत ।**

**प्रश्नः -३ द्वयोः टिप्पणी कार्या । ०४**

*(१) विराट्शरीरोत्पत्तिः ।* *(२) विदूरस्य प्रश्नाः ।*

*(३) ब्रह्मणा कृता भगवत्स्तुतिः ।* *(४) विदुरोद्धवसंयोगः ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तराणि लिखत । ०५**

*(१) भागवतशब्दस्य कोऽर्थः ?*

*(२) तृतीयस्कन्धस्य नाम किम् ?*

*(३) भगवतः मुख्यावताराः कति ?*

*(४) ब्रह्मण उत्पत्तेः स्थानं किम् ?*

*(५) मानवः कतमा सृष्टिः ?*

*(६) शरीराय अपरः शब्दः कः ?*

### युनिट-२

**प्रश्नः -५ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते भावार्थो लेख्यः । ०८**

*(१) सनकं च सनन्दं च सनातनमथात्मभूः ।*
*सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ॥*

*(२) कामं भवः स्ववृणितैर्निरयेषु नःस्ताच्चेतोऽलिवधदि नु ते पदयोः रमेत ।*
*वाचश्च नस्तुलसिवद्यदि तेडङ्घ्रिशोभाः पूर्येत ते गुणगुणैर्यदि कर्णरन्ध्रः ॥*

*(३) त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः ।*
*त्वमेकः क्लेशदस्तेषामनासन्नपदां तव ॥*

**प्रश्नः -६** **जयविजययोः वैकुण्ठात् पतनं सविस्तरं वर्णयत ।** **०८**

**अथवा**

**हिरण्याक्ष-हिरण्यकशिप्वोः जन्मकथां हिरण्याक्षस्य पराभवं च वर्णयत ।**

**प्रश्नः -७** **एकां टिप्पणीं लिखत ।** **०२**

*(१) दितेः गर्भधारणम् ।* *(२) हिरण्याक्षस्य दिग्विजयः ।*

**प्रश्नः -८** **द्वयोः उत्तरे लिखत ।** **०२**

*(१) हिरण्यकशिपुरिति शब्दस्य कोऽर्थः ?*

*(२) हिरण्यकशिपोः कति पुत्राः के च ते ?*

*(३) कर्दमऋषिणा तपश्चर्यया किं प्राप्तम् ?*

*(४) हिरण्याक्षहिरण्यकशिप्वोः ज्येष्ठः भ्राता कः ?*

**युनिट-३**

**प्रश्नः -९** **अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं विलिख्य संस्कृते भावार्थो लेख्यः ।** **०८**

*(१) नेह यत्कर्म धर्माय न विरागाय कल्पते ।*
*न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥*

*(२) यदाश्रयाः कथा मृष्टाः श्रृण्वन्ति कथयन्ति च ।*
*तपन्ति विविधास्तापा नैतान्मद्‌गतचेतसः ॥*

*(३) मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ।*
*वर्षीतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥*

**प्रश्नः -१०** **देवहूत्याः प्रश्नान् विवर्ण्य कपिलेन कृतं भक्तियोगस्य वर्णनं विधीयताम् ।** **०८**

**अथवा**

**अष्टाङ्गयोगस्य वर्णनं ग्रन्थोक्तदिशा कुरुत ।**

**प्रश्नः -११** **टिप्पणीद्वयं लिखत ।** **०४**

*(१) तत्त्वानामुत्पत्तिः ।* *(२) मानवयोनेः गतिः ।*

*(३) कालमहिमा ।* *(४) गृहासक्तानामधोगतिः ।*

**प्रश्नः -१२** **पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) देवहूत्याः भगिन्यौ के ?*

*(२) साङ्ख्यमतानुसारं कति तत्त्वानि ?*

*(३) साङ्ख्यशब्दस्य कोऽर्थः ?*

*(४) कर्दमदेवहूत्योः कति पुत्र्यः ?*

*(५) प्रकृति-पुरुषयोः को भेदः ?*

*(६) यमाः कति ? के च ते ?*

*(७) नियमाः कति के च ते ?*

---------------------